ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## षष्ठ काण्डे, चतुर्थः प्रश्नः

## Table of Contents

6 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः...................................... 3

6.4 षष्ठ काण्डे चतुर्थः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं .................... 3

==============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 6 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

### 6.4 षष्ठ काण्डे चतुर्थः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं

**TS 6.4.1.1 - Kramam**

यज्ञेन वै । वै प्रजापतिः । प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा – पतिः । प्रजा असृजत । प्रजा इति प्र – जाः । असृजत ताः । ता उपयड्भिः । उपयड्भिरेव । उपयड्भिरित्युपयट् – भिः । एवासृजत । असृजत यत् । यदुपयजः । उपयज उपयजति । उपयज इत्युप – यजः । उपयजति प्रजाः । उपयजतीत्युप – यजति । प्रजा एव । प्रजा इति प्र – जाः । एव तत् । तद् यजमानः । यजमानः सृजते । सृजते जघनार्द्धात् । जघनार्द्धादव । जघनार्द्धादिति जघन – अर्द्धात् । अव द्यति । द्यति जघनार्द्धात् । जघनार्द्धाद्धि । जघनार्द्धादिति जघन – अर्द्धात् । हि प्रजाः । प्रजाः प्रजायन्ते । प्रजा इति प्र – जाः ।

प्रजायन्ते स्थविमतः । प्रजायन्त इति प्र – जायन्ते । स्थविमतोऽव ।

अव द्यति । द्यति स्थविमतः । स्थविमतो हि । हि प्रजाः ।

प्रजाः प्रजायन्ते । प्रजा इति प्र – जाः । प्रजायन्तेऽसम्भिन्दन्न् ।

प्रजायन्त इति प्र – जायन्ते । असम्भिन्दन्नव ।

असम्भिन्दन्नित्यसम् – भिन्दन्न् । अव द्यति । द्यति प्राणानाम् ।

प्राणानामसम्भेदाय । प्राणानामिति प्र – अनानाम् । असम्भेदाय न ।

असम्भेदायेत्यसम् – भेदाय । न पर्यावर्तयति । पर्यावर्तयति यत् ।

पर्यावर्तयतीति परि – आवर्तयति । यत् पर्यावर्तयेत् ।

पर्यावर्तयेदुदावर्तः । पर्यावर्तयेदिति परि – आवर्तयेत् । उदावर्तः

प्रजाः । प्रजाः ग्राहुकः । प्रजा इति प्र – जाः । ग्राहुकः स्यात् ।

स्याथ् समुद्रम् । समुद्रम् गच्छ । गच्छ स्वाहा । स्वाहेति । इत्याह ।

आह रेतः । रेत एव । **1** (**50/68**)

**TS 6.4.1.2 - Kramam**

एव तत् । तद् दधाति । दधात्यन्तरिक्षम् । अन्तरिक्षम् गच्छ ।

गच्छ स्वाहा । स्वाहेति । इत्याह । आहान्तरिक्षेण । अन्तरिक्षेणैव ।

एवास्मै । अस्मै प्रजाः । प्रजाः प्र । प्रजा इति प्र – जाः ।

प्र जनयति । जनयत्यन्तरिक्षम् । अन्तरिक्ष॒ꣳ हि । ह्यनु । अनु प्रजाः ।
प्रजाः प्रजायन्ते । प्रजा इति प्र – जाः । प्रजायन्ते देवम् ।
प्रजायन्त इति प्र – जायन्ते । देवꣳ सवितारम् । सवितारम् गच्छ ।
गच्छ स्वाहा । स्वाहेति । इत्याह । आह सवितृप्रसूतः । सवितृप्रसूत
एव । सवितृप्रसूत इति सवितृ – प्रसूतः । एवास्मै । अस्मै प्रजाः ।
प्रजाः प्र । प्रजा इति प्र – जाः । प्र जनयति । जनयत्यहोरात्रे ।
अहोरात्रे गच्छ । अहोरात्रे इत्यहः – रात्रे । गच्छ स्वाहा । स्वाहेति ।
इत्याह । आहाहोरात्राभ्याम् । अहोरात्राभ्यामेव ।
अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एवास्मै । अस्मै प्रजाः ।
प्रजाः प्र । प्रजा इति प्र – जाः । प्र जनयति । जनयत्यहोरात्रे ।
अहोरात्रे हि । अहोरात्रे इत्यहः – रात्रे । ह्यनु । अनु प्रजाः ।
प्रजाः प्रजायन्ते । प्रजा इति प्र – जाः । प्रजायन्ते मित्रावरुणौ ।
प्रजायन्त इति प्र – जायन्ते । मित्रावरुणौ गच्छ । मित्रावरुणाविति
मित्रा – वरुणौ । गच्छ स्वाहा । स्वाहेति । **2 (50/62)**

**TS 6.4.1.3 - Kramam**

इत्याह । आह प्रजासु । प्रजास्वेव । प्रजास्विति प्र – जासु ।
एव प्रजातासु । प्रजातासु प्राणापानौ । प्रजातास्विति प्र – जातासु ।
प्राणापानौ दधाति । प्राणापानाविति प्राण–अपानौ । दधाति सोमम् ।
सोमम् गच्छ । गच्छ स्वाहा । स्वाहेति । इत्याह । आह सौम्याः ।
सौम्या हि । हि देवतया । देवतया प्रजाः । प्रजा यज्ञम् । प्रजा इति
प्र – जाः । यज्ञम् गच्छ । गच्छ स्वाहा । स्वाहेति । इत्याह ।
आह प्रजाः । प्रजा एव । प्रजा इति प्र – जाः । एव यज्ञियाः ।
यज्ञियाः करोति । करोति छन्दाꣳसि । छन्दाꣳसि गच्छ ।
गच्छ स्वाहा । स्वाहेति । इत्याह । आह पशवः । पशवो वै ।
वै छन्दाꣳसि । छन्दाꣳसि पशून् । पशूनेव । एवाव । अव रुन्धे ।
रुन्धे द्यावापृथिवी । द्यावापृथिवी गच्छ । द्यावापृथिवी इति
द्यावा – पृथिवी । गच्छ स्वाहा । स्वाहेति । इत्याह । आह प्रजाः ।
प्रजा एव । प्रजा इति प्र – जाः । एव प्रजाताः । प्रजाता
द्यावापृथिवीभ्याम् । प्रजाता इति प्र – जाताः ।
द्यावापृथिवीभ्यामुभयतः । द्यावापृथिवीभ्यामिति द्यावा–पृथिवीभ्याम् ।

उभयतः परि । परि गृह्णाति । गृह्णाति नभः ।
नभो दिव्यम् । 3 (50/59)

**TS 6.4.1.4 - Kramam**

दिव्यम् गच्छ । गच्छ स्वाहा । स्वाहेति । इत्याह । आह प्रजाभ्यः ।
प्रजाभ्य एव । प्रजाभ्य इति प्र - जाभ्यः । एव प्रजाताभ्यः ।
प्रजाताभ्यो वृष्टिम् । प्रजाताभ्य इति प्र - जाताभ्यः । वृष्टिम् नि ।
नि यच्छति । यच्छत्यग्निम् । अग्निम् वैँश्वानरम् । वैश्वानरम् गच्छ ।
गच्छ स्वाहा । स्वाहेति । इत्याह । आह प्रजाः । प्रजा एव ।
प्रजा इति प्र - जाः । एव प्रजाताः । प्रजाता अस्याम् । प्रजाता
इति प्र - जाताः । अस्याम् प्रति । प्रतिष्ठापयति । स्थापयति
प्राणानाम् । प्राणानाम् वैँ । प्राणानामिति प्र - अनानाम् । वा एषः ।
एषोऽव । अव द्यति । द्यति यः । योऽवद्यति । अवद्यति गुदस्य ।
अवद्यतीत्यव - द्यति । गुदस्य मनः । मनो मे । मे हार्दि ।
हार्दि यच्छ । यच्छेति । इत्याह । आह प्राणान् । प्राणानेव ।
प्राणानिति प्र - अनान् । एव यथास्थानम् । यथास्थानमुप ।
यथास्थानमिति यथा - स्थानम् । उप ह्वयते । ह्वयते पशोः ।

पशोर् वै । वा आलब्धस्य । आलब्धस्य हृदयम् ।
आलब्धस्येत्या - लब्धस्य । हृदय॑ꣳ शुक् । शुगृच्छति ।
ऋच्छति सा । सा हृदयशूलम् ( ) । हृदयशूलमभि ।
हृदयशूलमिति हृदय - शूलम् । **4 (50/60)**

**TS 6.4.1.5 - Kramam**

अभि सम् । समेति । एति यत् । यत् पृथिव्याम् । पृथिव्या॑ꣳ
हृदयशूलम् । हृदयशूलमुद्वासयेत् । हृदयशूलमिति हृदय-शूलम् ।
उद्वासयेत् पृथिवीम् । उद्वासयेदित्युत् - वासयेत् । पृथिवी॑ꣳ
शुचा । शुचाऽर्पयेत् । अर्पयेद् यत् । यदप्सु । अप्स्वपः ।
अप्स्वित्यप् - सु । अपः शुचा । शुचाऽर्पयेत् । अर्पयेच्छुष्कस्य ।
शुष्कस्य च । चार्द्रस्य । आर्द्रस्य च । च सन्धौ । सन्धावुत् ।
सन्धाविति सम् - धौ । उद् वासयति । वासयत्युभयस्य ।
उभयस्य शान्त्यै । शान्त्यै यम् । यम् द्विष्यात् । द्विष्यात् तम् ।
तम् ध्यायेत् । ध्यायेच्छुचा । शुचैव । एवैनम् । एनमर्पयति ।
अर्पयतीत्यर्पयति ॥ **5 (32/36)** ***(रेतो - मित्रावरुणौ - गच्छ - स्वाहा - नभो - हृदयशूलम् - द्वात्रि॑ꣳशच्च) (A1)***

**TS 6.4.2.1 - Kramam**

देवा वै । वै यज्ञम् । यज्ञमाग्नीद्ध्रे । आग्नीद्ध्रे वि । आग्नीद्ध्र

इत्याग्नि - इद्ध्रे । व्यभजन्त । अभजन्त ततः । ततो यत् ।

यदत्यशिष्यत । अत्यशिष्यत तत् । अत्यशिष्यतेत्यति - अशिष्यत ।

तदब्रुवन्न् । अब्रुवन् वसतु । वसतु नु । नु नः । न इदम् । इदमिति ।

इति तत् । तद् वसतीवरीणाम् । वसतीवरीणाम्ँ वसतीवरित्वम् ।

वसतीवरित्वम् तस्मिन्न् । वसतीवरित्वमिति वसतीवरि - त्वम् ।

तस्मिन् प्रातः । प्रातर् न । न सम् । समशक्नुवन् । अशक्नुवन् तत् ।

तदफ्सु । अफ्सु प्र । अफ्सित्यप्-सु । प्रावेशयन् । अवेशयन् ताः ।

ता वसतीवरीः । वसतीवरीरभवन् । अभवन् वसतीवरीः । वसतीवरीर्

गृह्णाति । गृह्णाति यज्ञः । यज्ञो वै । वै वसतीवरीः । वसतीवरीर्

यज्ञम् । यज्ञमेव । एवारभ्य । आरभ्य गृहीत्वा । आरभ्येत्या - रभ्य ।

गृहीत्वोप । उप वसति । वसति यस्य । यस्यागृहीताः ।

अगृहीता अभि । अभि निम्रोचेत् । निम्रोचेदनारब्धः । निम्रोचेदिति

नि - म्रोचेत् । अनारब्धोऽस्य । अनारब्ध इत्यना - रब्धः ।

अस्य यज्ञः । यज्ञः स्यात् । स्याद् यज्ञम् । **6** (**50/57**)

**TS 6.4.2.2 - Kramam**

यज्ञम् ँवि । विच्छिन्द्यात् । छिन्द्याज् ज्योतिष्या । ज्योतिष्या वा ।

वा गृह्णीयात् । गृह्णियाद्धिरण्यम् । हिरण्यम् ँवा । वाऽवधाय ।

अवधाय सशुक्राणाम् । अवधायेत्यव - धाय । सशुक्राणमेव ।

सशुक्राणामिति स - शुक्राणाम् । एव गृह्णाति । गृह्णाति यः ।

यो वा । वा ब्राह्मणः । ब्राह्मणो बहुयाजी । बहुयाजी तस्य ।

बहुयाजीति बहु-याजी । तस्य कुम्भ्यानाम् । कुम्भ्यानाम् गृह्णीयात् ।

गृह्णीयाथ् सः । स हि । हि गृहीतवसतीवरीकः । गृहीतवसतीवरीको

वसतीवरीः । गृहीतवसतीवरीक इति गृहीत - वसतीवरीकः ।

वसतीवरीर् गृह्णाति । गृह्णाति पशवः । पशवो वै । वै वसतीवरीः ।

वसतीवरीः पशून् । पशूनेव । एवारभ्य । आरभ्य गृहीत्वा ।

आरभ्येत्या - रभ्य । गृहीत्वोप । उप वसति । वसति यत् ।

यदन्वीपम् । अन्वीपम् तिष्ठन् । तिष्ठन् गृह्णीयात् ।

गृह्णीयान् निर्मार्गुकाः । निर्मार्गुका अस्मात् । निर्मार्गुका इति

निः - मार्गुकाः । अस्मात् पशवः । पशवः स्युः । स्युः प्रतीपम् ।

प्रतीपम् तिष्ठन्न् । तिष्ठन् गृह्णाति । गृह्णाति प्रतिरुद्ध्य । प्रतिरुद्ध्यैव ।

प्रतिरुद्ध्येति प्रति – रुद्ध्य । एवास्मै । अस्मै पशून् ।

पशून् गृह्णाति । गृह्णातीन्द्रः । इन्द्रो वृत्रम् । **7 (50/57)**

**TS 6.4.2.3 - Kramam**

वृत्रमहन्न् । अहन्थ् सः । सोऽपः । अपोऽभि । अभ्यम्रियत ।

अम्रियत तासाम् । तासाम् ँयत् । यन् मेद्ध्यम् । मेद्ध्यम् ँयज्ञियम् ।

यज्ञियꣳ सदेवम् । सदेवमासीत् । सदेवमिति स – देवम् ।

आसीत् तत् । तदति । अत्यमुच्यत । अमुच्यत ताः । ता वहन्तीः ।

वहन्तिरभवन् । अभवन् वहन्तीनाम् । वहन्तीनाम् गृह्णाति ।

गृह्णाति याः । या एव । एव मेद्ध्याः । मेद्ध्या यज्ञियाः । यज्ञियाः

सदेवाः । सदेवा आपः । सदेवा इति स – देवाः । आपस्तासाम् ।

तासामेव । एव गृह्णाति । गृह्णाति न । नान्तमाः । अन्तमा वहन्तीः ।

वहन्तीरति । अतीयात् । इयाद् यत् । यदन्तमाः । अन्तमा वहन्तीः ।

वहन्तीरतीयात् । अतीयाद् यज्ञम् । अतीयादित्यति – इयात् ।

यज्ञमति । अति मन्येत । मन्येत न । न स्थावराणाम् ।

स्थावराणाम् गृह्णीयात् । गृह्णीयाद् वरुणगृहीताः । वरुणगृहीता वै ।

वरुणगृहीता इति वरुण – गृहीताः । वै स्थावराः । स्थावरा यत् ।

यथ् स्थावराणाम् । स्थावराणाम् गृह्णीयात् ।

गृह्णीयाद् वरुणेन । **8 (50/54)**

**TS 6.4.2.4 - Kramam**

वरुणेनास्य । अस्य यज्ञम् । यज्ञम् ग्राहयेत् । ग्राहयेद् यत् । यद् वै ।

वै दिवा । दिवा भवति । भवत्यपः । अपो रात्रिः । रात्रिः प्र ।

प्र विशति । विशति तस्मात् । तस्मात् ताम्राः । ताम्रा आपः ।

आपो दिवा । दिवा ददृश्रे । ददृश्रे यत् । यन् नक्तम् । नक्तम् भवति ।

भवत्यपः । अपोऽहः । अहः प्र । प्र विशति । विशति तस्मात् ।

तस्माच् चन्द्राः । चन्द्रा आपः । आपो नक्तम् । नक्तम् ददृश्रे ।

ददृश्रे छायायै । छायायै च । चातपतः । आतपतश्च । आतपत

इत्या - तपतः । च सन्धौ । सन्धौ गृह्णाति । सन्धाविति सम्-धौ ।

गृह्णात्यहोरात्रयोः । अहोरात्रयोरेव । अहोरात्रयोरित्यहः - रात्रयोः ।

एवास्मै । अस्मै वर्णम् । वर्णम् गृह्णाति । गृह्णाति हवीष्मतीः ।

हविष्मतीरिमाः । इमा आपः । आप इति । इत्याह ।

आह हविष्कृतानाम् । हविष्कृतानामेव । हविष्कृतानामिति

हविः - कृतानाम् । एव गृह्णाति । गृह्णाति हविष्मान् ।

हविष्मा॒ꣳ॑ अस्तु । अस्तु॒ सूर्यः॑ । **9** (**50/54**)

**TS 6.4.2.5 - Kramam**

सूर्य॒ इति॑ । इत्याह॑ । आ॒ह॒ सशु॑क्राणाम् । सशु॑क्राणाम॒ेव ।

सशु॑क्राणामि॒ति॒ स – शु॒क्रा॒णा॒म् । ए॒व गृ॑ह्णाति । गृ॒ह्णा॒त्य॒नु॒ष्टुभा॑ ।

अ॒नु॒ष्टु॑भा गृह्णाति । अ॒नु॒ष्टु॑भेत्यनु – स्तुभा॑ । गृ॒ह्णा॒ति॒ वाक् । वाग् वै ।

वा अ॑नु॒ष्टुक् । अ॒नु॒ष्टुग् वा॒चा । अ॒नु॒ष्टु॑गित्यनु – स्तुक् । वा॒चैव ।

ए॒वैना॑ः । ए॒नाः॒ सर्व॑या । सर्व॑या गृह्णाति । गृ॒ह्णा॒ति॒ चतु॑ष्पदया ।

चतु॑ष्पद॒यर्चा । चतु॑ष्पद॒येति॒ चतुः – प॒द॒या॒ । ऋ॒चा गृ॑ह्णाति । गृ॒ह्णा॒ति॒

त्रिः । त्रिः सा॑दयति । सा॒द॒य॒ति॒ स॒प्त । स॒प्त सम् । सम् प॑द्यन्ते ।

प॒द्य॒न्ते॒ स॒प्तप॑दा । स॒प्तप॒दा शक्व॑री । स॒प्तप॒देति॒ स॒प्त – प॒दा॒ ।

शक्व॑री प॒शवः॑ । प॒शवः॒ शक्व॑री । शक्व॑री प॒शून् । प॒शू॒नेव ।

ए॒वाव॑ । अव॑ रुन्धे । रु॒न्धे॒ऽस्मै । अ॒स्मै वै । वै लो॒का॑य ।

लो॒का॒य॒ गार्.ह॑पत्यः । गार्.ह॑पत्य॒ आ । गार्.ह॑पत्य॒ इ॒ति॒

गार्.ह॑ – प॒त्यः॒ । आ धी॑यते । धी॒य॒ते॒ऽमु॒ष्मै॑ । अ॒मु॒ष्मा॑ आहव॒नीय॑ः ।

आ॒ह॒व॒नी॒यो॒ यत् । आ॒ह॒व॒नी॒य॒ इ॒त्या॑ – ह॒व॒नी॑यः । यद् गार्.ह॑पत्ये ।

गार्.ह॑पत्य उपसा॒दये॑त् । गार्.ह॑पत्य॒ इ॒ति॒ गार्.ह॑ – प॒त्ये॒ ।

उपसादयेदस्मिन् । उपसादयेदित्युप – सादयेत् । अस्मिन् ँल्लोके ।
लोके पशुमान् । पशुमान्थ् स्यात् । पशुमानिति पशु – मान् ।
स्याद् यत् । यदाहवनीये । आहवनीयेऽमुष्मिन्न् । आहवनीय
इत्या – हवनीये । अमुष्मिन् ँल्लोके । **10 (50/61)**

**TS 6.4.2.6 - Kramam**

लोके पशुमान् । पशुमान्थ् स्यात् । पशुमानिति पशु – मान् ।
स्यादुभयोः । उभयोरुप । उप सादयति । सादयत्युभयोः ।
उभयोरेव । एवैनम् । एनम् ँल्लोकयोः । लोकयोः पशुमन्तम् ।
पशुमन्तम् करोति । पशुमन्तमिति पशु – मन्तम् । करोति सर्वतः ।
सर्वतः परि । परि हरति । हरति रक्षसाम् । रक्षसामपहत्यै ।
अपहत्या इन्द्राग्नियोः । अपहत्या इत्यप – हत्यै । इन्द्राग्नियोर्
भागधेयीः । इन्द्राग्नियोरितीन्द्र – अग्नियोः । भागधेयीः स्थ ।
भागधेयीरिति भाग – धेयीः । स्थेति । इत्याह । आह यथायजुः ।
यथायजुरेव । यथायजुरिति यथा – यजुः । एवैतत् । एतदाग्नीद्ध्रे ।
आग्नीद्ध्र उप । आग्नीद्ध्र इत्याग्नि – इद्ध्रे । उप वासयति ।
वासयत्येतत् । एतद् वै । वै यज्ञस्य । यज्ञस्यापराजितम् ।

अपराजितम् ँयत् । अपराजितमित्यपरा – जितम् । यदाग्नीद्ध्रम् ।
आग्नीद्ध्रम् ँयत् । आग्नीद्ध्रमित्याग्नि – इद्ध्रम् । यदेव ।
एव यज्ञस्य । यज्ञस्यापराजितम् । अपराजितम् तत् ।
अपराजितमित्यपरा – जितम् । तदेव । एवैनाः । एना उप ।
उप वासयति । वासयति यतः । यतः खलु । खलु वै । वै यज्ञस्य ।
यज्ञस्य विततस्य । विततस्य न । विततस्येति वि – ततस्य ।
न क्रियते ( ) । क्रियते तत् । तदनु । अनु यज्ञम् । यज्ञꣳ रक्षाꣳसि ।
रक्षाꣳस्यव । अव चरन्ति । चरन्ति यत् । यद् वहन्तीनाम् ।
वहन्तिनाम् गृह्णाति । गृह्णाति क्रियमाणम् । क्रियमाणमेव । एव तत् ।
तद् यज्ञस्य । यज्ञस्य शये । शये रक्षसाम् । रक्षसामनन्ववचाराय ।
अनन्ववचाराय न । अनन्ववचारायेत्यननु – अवचाराय । न हि ।
ह्येताः । एता ईलयन्ति । ईलयन्त्या । आ तृतीयसवनात् ।
तृतीयसवनात् परि । तृतीयसवनादिति तृतीय – सवनात् ।
परि शेरे । शेरे यज्ञस्य । यज्ञस्य सन्तत्यै ।
सन्तत्या इति सम् – तत्यै ॥ **11 (76/89)**

*(स्या - दिन्द्रो - गृह्णीया - दस्त्व - मुष्मिन् - क्रियते - षड्विꣳशतिश्च) (A2)*

**TS 6.4.3.1 - Kramam**

ब्रह्मवादिनो वदन्ति । ब्रह्मवादिन इति ब्रह्म - वादिनः । वदन्ति सः ।
स तु । त्वै । वा अद्ध्वर्युः । अद्ध्वर्युः स्यात् । स्याद् यः ।
यः सोमम् । सोममुपावहरन्न् । उपावहरन्थ् सर्वाभ्यः ।
उपावहरनित्युप - अवहरन्न् । सर्वाभ्यो देवताभ्यः । देवताभ्य
उपावहरेत् । उपावहरेदिति । उपावहरेदित्युप-अवहरेत् । इति हृदे ।
हृदे त्वा । त्वेति । इत्याह । आह मनुष्येभ्यः । मनुष्येभ्य एव ।
एवैतेन । एतेन करोति । करोति मनसे । मनसे त्वा । त्वेति ।
इत्याह । आह पितृभ्यः । पितृभ्य एव । पितृभ्य इति पितृ - भ्यः ।
एवैतेन । एतेन करोति । करोति दिवे । दिवे त्वा । त्वा सूर्याय ।
सूर्याय त्वा । त्वेति । इत्याह । आह देवेभ्यः । देवेभ्य एव । एवैतेन ।
एतेन करोति । करोत्येतावतीः । एतावतीर् वै । वै देवताः ।
देवतास्ताभ्यः । ताभ्य एव । एवैनम् । एनꣳ सर्वाभ्यः । सर्वाभ्य
उपावहरति । उपावहरति पुरा । उपावहरतीत्युप - अवहरति ।

पुरा वाचः । वाचः प्रवदितोः । **12** (**50/55**)

**TS 6.4.3.2 - Kramam**

प्रवदितोः प्रातरनुवाकम् । प्रवदितोरिति प्र – वदितोः ।

प्रातरनुवाकमुपाकरोति । प्रातरनुवाकमिति प्रातः – अनुवाकम् ।

उपाकरोति यावती । उपाकरोतीत्युप – आकरोति । यावत्येव ।

एव वाक् । वाक् ताम् । तामव । अव रुन्धे । रुन्धेऽपः । अपोऽग्रे ।

अग्रेऽभिव्याहरति । अभिव्याहरति यज्ञः ।

अभिव्याहरतीत्यभि–व्याहरति । यज्ञो वै । वा आपः । आपो यज्ञम् ।

यज्ञमेव । एवाभि । अभि वाचम् । वाचम् वि । वि सृजति ।

सृजति सर्वाणि । सर्वाणि छन्दा॑ꣳसि । छन्दा॑ꣳस्यनु । अन्वाह ।

आह पशवः । पशवो वै । वै छन्दा॑ꣳसि । छन्दा॑ꣳसि पशून् ।

पशूनेव । एवाव । अव रुन्धे । रुन्धे गायत्रिया ।

गायत्रिया तेजस्कामस्य । तेजस्कामस्य परि । तेजस्कामस्येति

तेजः – कामस्य । परि दद्ध्यात् । दद्ध्यात् त्रिष्टुभा ।

त्रिष्टुभेन्द्रियकामस्य । इन्द्रियकामस्य जगत्या ।

इन्द्रियकामस्येतीन्द्रिय – कामस्य । जगत्या पशुकामस्य ।

पशुकामस्यानुष्टुभा । पशुकामस्येति पशु - कामस्य । अनुष्टुभा प्रतिष्ठाकामस्य । अनुष्टुभेत्यनु - स्तुभा । प्रतिष्ठाकामस्य पङ्क्त्या । प्रतिष्ठाकामस्येति प्रतिष्ठा–कामस्य । पङ्क्त्या यज्ञकामस्य । यज्ञकामस्य विराजा । यज्ञकामस्येति यज्ञ - कामस्य । विराजाऽन्नकामस्य । विराजेति वि - राजा । अन्नकामस्य शृणोतु । अन्नकामस्येत्यन्न - कामस्य । शृणोत्वग्निः । अग्निः समिधा । समिधा हवम् । समिधेति सम् - इधा । हवम् मे । **13 (50/63)**

**TS 6.4.3.3 - Kramam**

म इति । इत्याह । आह सवितृप्रसूतः । सवितृप्रसूत एव । सवितृप्रसूत इति सवितृ - प्रसूतः । एव देवताभ्यः । देवताभ्यो निवेद्य । निवेद्यापः । निवेद्येति नि - वेद्य । अपोऽच्छ । अच्छैति । एत्यपः । अप इष्य । इष्य होतः । होतरिति । इत्याह । आहेषितम् । इषितꣳ हि । हि कर्म । कर्म क्रियते । क्रियते मैत्रावरुणस्य । मैत्रावरुणस्य चमसाद्ध्वर्यो । मैत्रावरुणस्येति मैत्रा - वरुणस्य । चमसाद्ध्वर्यवा । चमसाद्ध्वर्यविति चमस - अद्ध्वर्यो । आ द्रव । द्रवेति । इत्याह । आह मित्रावरुणौ । मित्रावरुणौ वै ।

मित्रावरुणाविति मित्रा - वरुणौ । वा अपाम् । अपाम् नेतारौ ।
नेतारौ ताभ्याम् । ताभ्यामेव । एवैनाः । एना अच्छ । अच्छैति ।
एति देवीः । देवीरापः । आपो अपाम् । अपाम् नपात् । नपादिति ।
इत्याह । आहाहुत्या । आहुत्यैव । आहुत्येत्या - हुत्या । एवैनाः ।
एना निष्क्रीय । निष्क्रीय गृह्णाति । निष्क्रीयेति निः - क्रीय ।
गृह्णात्यथो । अथो हविष्कृतानाम् । अथो इत्यथो । हविष्कृतानामेव ।
हविष्कृतानामिति हविः - कृतानाम् । एवाभिघृतानाम् ।
अभिघृतानाम् गृह्णाति । अभिघृतानामित्यभि - घृतानाम् ।
गृह्णाति कार्.षिः । **14 (50/60)**

**TS 6.4.3.4 - Kramam**

कार्.षिरसि । असीति । इत्याह । आह शमलम् । शमलमेव ।
एवासाम् । आसामप । अप प्लावयति । प्लावयति समुद्रस्य ।
समुद्रस्य वः । वोऽक्षित्यै । अक्षित्या उत् । उन् नये । नय इति ।
इत्याह । आह तस्मात् । तस्मादद्यमानाः । अद्यमानाः पीयमानाः ।
पीयमाना आपः । आपो न । न क्षीयन्ते । क्षीयन्ते योनिः ।
योनिर् वै । वै यज्ञस्य । यज्ञस्य चात्वालम् । चात्वालम् यँज्ञः ।

यज्ञो वसतीवरीः । वसतीवरीर्. होतृचमसम् । होतृचमसम् च ।

होतृचमसमिति होतृ - चमसम् । च मैत्रावरुणचमसम् ।

मैत्रावरुणचमसम् च । मैत्रावरुणचमसमिति मैत्रावरुण - चमसम् ।

च स॒ंस्पर्श्य । स॒ंस्पर्श्य वसतीवरीः । स॒ंस्पर्श्येति

सम् - स्पर्श्य । वसतीवरीर् व्यानयति । व्यानयति यज्ञस्य ।

व्यानयतीति वि-आनयति । यज्ञस्य सयोनित्वाय । सयोनित्वायाथो ।

सयोनित्वायेति सयोनि - त्वाय । अथो स्वात् । अथो इत्यथो ।

स्वादेव । एवैनाः । एना योनेः । योनेः प्र । प्र जनयति ।

जनयत्यद्ध्वर्यो । अद्ध्वर्योऽवेः । अद्ध्वर्यो इत्यद्ध्वर्यो ।

अवेरपा(3)ः । अपा(3) इति । इत्याह । आहोत ( ) । उतेम् ।

ईमनन्नमुः । अनन्नमुरुत । उतेमाः । इमाः पश्य । पश्येति ।

इति वाव । वावैतत् । एतदाह । आहयदि । यद्यग्निष्टोमः । अग्निष्टोमो

जुहोति । अग्निष्टोम इत्यग्नि - स्तोमः । जुहोति यदि । यद्युक्थ्यः ।

उक्थ्यः परिधौ । परिधौ नि । परिधाविति परि - धौ । नि मार्ष्टि ।

मार्ष्टि यदि । यद्यतिरात्रः । अतिरात्रो यजुः । अतिरात्र इत्यति-रात्रः ।

यजुर् वदन्न् । वदन् प्र । प्र पद्यते । पद्यते यज्ञक्रतूनाम् ।

यज्ञक्रतूनाम् ँव्यावृत्त्यै । यज्ञक्रतूनामिति यज्ञ – क्रतूनाम् ।

व्यावृत्त्या इति वि – आवृत्त्यै ॥ **15 (75/86)**

*(वाचो–हव–मभिघृतानाम् गृह्णात्यु – त – पञ्चवि॒ँशतिश्च) (A3)*

**TS 6.4.4.1 - Kramam**

देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसव इति । प्रसव

इति प्र–सवे । इति ग्रावाणम् । ग्रावाणमा । आ दत्ते । दत्ते प्रसूत्यै ।

प्रसूत्या अश्विनोः । प्रसूत्या इति प्र – सूत्यै । अश्विनोर् बाहुभ्याम् ।

बाहुभ्यामिति । बाहुभ्यामिति बाहु – भ्याम् । इत्याह । आहाश्विनौ ।

अश्विनौ हि । हि देवानाम् । देवानामद्ध्वर्यू । अद्ध्वर्यू आस्ताम् ।

अद्ध्वर्यू इत्यद्ध्वर्यू । आस्ताम् पूष्णः । पूष्णो हस्ताभ्याम् ।

हस्ताभ्यामिति । इत्याह । आह यत्यै । यत्यै पशवः । पशवो वै ।

वै सोमः । सोमो व्यानः । व्यान उपा॒ँशुसवनः ।

व्यान इति वि – अनः । उपा॒ँशुसवनो यत् । उपा॒ँशुसवन

इत्युपा॒ँशु – सवनः । यदुपा॒ँशुसवनम् । उपा॒ँशुसवनमभि ।

उपा॒ँशुसवनमित्युपा॒ँशु – सवनम् । अभि मिमीते ।

मिमीते व्यानम् । व्यानमेव । व्यानमिति वि - अनम् । एव पशुषु ।
पशुषु दधाति । दधातीन्द्राय । इन्द्राय त्वा । त्वेन्द्राय । इन्द्राय त्वा ।
त्वेति । इति मिमीते । मिमीत इन्द्राय । इन्द्राय हि । हि सोमः ।
सोम आह्रियते । आह्रियते पञ्च । आह्रियत इत्या - ह्रियते ।
पञ्च कृत्वः । कृत्वो यजुषा । यजुषा मिमीते ।
मिमीते पञ्चाक्षरा । 16 (50/59)

**TS 6.4.4.2 - Kramam**

पञ्चाक्षरा पङ्क्तिः । पञ्चाक्षरेति पञ्च-अक्षरा । पङ्क्तिः पाङ्क्तः ।
पाङ्क्तो यज्ञः । यज्ञो यज्ञम् । यज्ञमेव । एवाव । अव रुन्धे । रुन्धे
पञ्च । पञ्च कृत्वः । कृत्वस्तूष्णीम् । तूष्णीम् दश । दश सम् ।
सम् पद्यन्ते । पद्यन्ते दशाक्षरा । दशाक्षरा विराट् । दशाक्षरेति
दश - अक्षरा । विराडन्नम् । विराडिति वि - राट् । अन्नम् ँविराट् ।
विराड् विराजा । विराडिति वि - राट् । विराजैव । विराजेति
वि - राजा । एवान्नाद्यम् । अन्नाद्यमव । अन्नाद्यमित्यन्न - अद्यम् ।
अव रुन्धे । रुन्धे श्रात्राः । श्रात्राः स्थ । स्थ वृत्रतुरः । वृत्रतुर इति ।
वृत्रतुर इति वृत्र - तुरः । इत्याह । आहैषः । एष वै । वा अपाम् ।

अपा॒ꣳ॒ सोम॑पी॒थः । सो॒म॒पी॒थो यः । सो॒म॒पी॒थ इति॑ सोम – पी॒थः ।
य ए॒वम् । ए॒वम् वेद॑ । वे॒द न । नाफ्सु । अ॒फ्स्वार्ति॑म् ।
अ॒फ्स्वित्य॑प् – सु । आर्ति॒मा । आर्च्छ॑ति । ऋ॒च्छ॒ति॒ यत् । यत् ते॑ ।
ते॒ सो॒म॒ । सो॒म॒ दि॒वि । दि॒वि ज्योतिः॑ । ज्योति॑रि॒ति । इत्या॑ह ।
आ॒है॒भ्यः । ए॒भ्य ए॒व । ए॒वैन॑म् । ए॒न॒म् लो॒केभ्यः॑ । **17 (50/59)**

**TS 6.4.4.3 - Kramam**

लो॒केभ्यः॒ सम् । सम् भ॑रति । भ॒र॒ति॒ सोम॑ः । सोमो॒ वै । वै राजा॑ ।
राजा॒ दिशः॑ । दि॒शो॑ऽभि । अ॒भ्य॑द्ध्यायत् । अ॒द्ध्या॒य॒थ् सः ।
स दि॒शः । दि॒शो॑ऽनु । अ॒नु प्र । प्रावि॑शत् । अ॒वि॒श॒त् प्राक् ।
प्रागपा॑क् । अपा॒गुद॑क् । उदग॒धरा॑क् । अ॒ध॒रागि॑ति । इत्या॑ह ।
आ॒ह॒ दि॒ग्भ्यः । दि॒ग्भ्य ए॒व । दि॒ग्भ्य इति॑ दिक् – भ्यः । ए॒वैन॑म् ।
ए॒न॒ꣳ॒ सम् । सम् भ॑रति । भ॒रत्यथो॑ । अथो॒ दिशः॑ । अथो॒ इत्यथो॑ ।
दिश॑ ए॒व । ए॒वास्मै॑ । अ॒स्मा॒ अव॑ । अव॑ रुन्धे । रु॒न्धेऽम्ब॑ ।
अम्ब॒ नि । निष्व॑र । स्व॒रेति॑ । इत्या॑ह । आ॒ह॒ का॒मु॑काः । का॒मु॑का
ए॒नम् । ए॒न॒ꣳ॒ स्त्रियः॑ । स्त्रियो॑ भवन्ति । भ॒व॒न्ति॒ यः । य ए॒वम् ।
ए॒वम् वेद॑ । वे॒द यत् । यत् ते॑ । ते॒ सो॒म॒ । सो॒मादा॑भ्यम् ।

अदाभ्यम् नाम । नाम जागृवि । जागृवीति ( ) । इत्याह । **18** (**50/52**)

**TS 6.4.4.4 - Kramam**

आहैषः । एष वै । वै सोमस्य । सोमस्य सोमपीथः । सोमपीथो

यः । सोमपीथ इति सोम–पीथः । य एवम् । एवम् ँवेद । वेद न ।

न सौम्याम् । सौम्यामार्तिम् । आर्तिमा । आर्च्छति । ऋच्छति घ्नन्ति ।

घ्नन्ति वै । वा एतत् । एतथ् सोमम् । सोमम् ँयत् । यदभिषुण्वन्ति ।

अभिषुण्वन्त्य॑ꣳशून् । अभिषुण्वन्तीत्यभि – सुन्वन्ति । अ॑ꣳशूनप ।

अप गृह्णाति । गृह्णाति त्रायते । त्रायत एव । एवैनम् । एनम् प्राणाः ।

प्राणा वै । प्राणा इति प्र–अनाः । वा अ॑ꣳशवः । अ॑ꣳशवः पशवः ।

पशवः सोमः । सोमोऽ॑ꣳशून् । अ॑ꣳशून् पुनः । पुनरपि ।

अपि सृजति । सृजति प्राणान् । प्राणानेव । प्राणानिति प्र – अनान् ।

एव पशुषु । पशुषु दधाति । दधाति द्वौद्वौ । द्वौद्वावपि । द्वौद्वाविति

द्वौ – द्वौ । अपि सृजति । सृजति तस्मात् । तस्माद् द्वौद्वौ ।

द्वौद्वौ प्राणाः । द्वौद्वाविति द्वौ – द्वौ ।

प्राणा इति प्र – अनाः ॥ **19** (**44/50**)

*(यजुषा मिमीत – एनम् – जागृवीति – चतुश्चत्वारि॑ꣳशच्च) (A4)*

**TS 6.4.5.1 - Kramam**

प्राणो वै । प्राण इति प्र – अनः । वा एषः । एष यत् । यदुपा॑शुः ।
उपा॑शुर् यत् । उपा॑शुरित्युप – अ॑शुः । यदुपा॑श्वग्राः ।
उपा॑श्वग्रा ग्रहाः । उपा॑श्वग्रा इत्युपा॑शु – अग्राः । ग्रहा गृह्यन्ते ।
गृह्यन्ते प्राणम् । प्राणमेव । प्राणमिति प्र–अनम् । एवानु । अनु प्र ।
प्र यन्ति । यन्त्यरुणः । अरुणो ह । ह स्म । स्माह । आहौपवेशिः ।
औपवेशिः प्रातस्सवने । औपवेशिरित्यौप – वेशिः । प्रातस्सवन
एव । प्रातस्सवन इति प्रातः – सवने । एवाहम् । अहम् यज्ञम् ।
यज्ञ॑ सम् । स॑ स्थापयामि । स्थापयामि तेन । तेन ततः ।
ततः स॑स्थितेन । स॑स्थितेन चरामि । स॑स्थितेनेति
सम् – स्थितेन । चरामीति । इत्यष्टौ । अष्टौ कृत्वः । कृत्वोऽग्रे ।
अग्रेऽभि । अभिषुणोति । सुनोत्यष्टाक्षरा । अष्टाक्षरा गायत्री ।
अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री गायत्रम् । गायत्रम् प्रातस्सवनम् ।
प्रातस्सवनम् प्रातस्सवनम् । प्रातस्सवनमिति प्रातः – सवनम् ।
प्रातस्सवनमेव । प्रातस्सवनमिति प्रातः – सवनम् । एव तेन ।
तेनाप्नोति । आप्नोत्येकादश । एकादश कृत्वः । कृत्वो द्वितीयम् ।

द्वितीयमेकादशाक्षरा । एकादशाक्षरा त्रिष्टुप् ।

एकादशाक्षरेत्येकादश - अक्षरा । त्रिष्टुप् त्रैष्टुभम् ।

त्रैष्टुभम् माद्ध्यन्दिनम् । माद्ध्यन्दिन॰ सवनम् । **20 (50/61)**

**TS 6.4.5.2 - Kramam**

सवनम् माद्ध्यन्दिनम् । माद्ध्यन्दिनमेव । एव सवनम् । सवनम्

तेन । तेनाप्नोति । आप्नोति द्वादश । द्वादश कृत्वः । कृत्वस्तृतीयम् ।

तृतीयम् द्वादशाक्षरा । द्वादशाक्षरा जगती । द्वादशाक्षरेति

द्वादश - अक्षरा । जगती जागतम् । जागतम् तृतीयसवनम् ।

तृतीयसवनम् तृतीयसवनम् । तृतीयसवनमिति तृतीय - सवनम् ।

तृतीयसवनमेव । तृतीयसवनमिति तृतीय - सवनम् । एव तेन ।

तेनाप्नोति । आप्नोत्येताम् । एता॰ ह । ह वाव । वाव सः ।

स यज्ञस्य । यज्ञस्य स॰स्थितिम् । स॰स्थितिमुवाच ।

स॰स्थितिमिति सम् - स्थितिम् । उवाचास्कन्दाय ।

अस्कन्दायास्कन्नम् । अस्कन्न॰ हि । हि तत् । तद् यत् ।

यद् यज्ञस्य । यज्ञस्य स॰स्थितस्य । स॰स्थितस्य स्कन्दति ।

स॰स्थितस्येति सम् - स्थितस्य । स्कन्दत्यथो । अथो खलु ।

अथो इत्यथो । खल्वाहुः । आहुर् गायत्री । गायत्री वाव । वाव प्रातस्सवने । प्रातस्सवने न । प्रातस्सवन इति प्रातः – सवने । नातिवादे । अतिवाद इति । अतिवाद इत्यति – वादे । इत्यनतिवादुकः । अनतिवादुक एनम् । अनतिवादुक इत्यनति – वादुकः । एनम् भ्रातृव्यः । भ्रातृव्यो भवति । भवति यः । य एवम् । एवम् वेद । वेद तस्मात् । तस्मादष्टावष्टौ । अष्टावष्टौ कृत्वः । अष्टावष्टावित्यष्टौ – अष्टौ । **21 (50/60)**

**TS 6.4.5.3 - Kramam**

कृत्वोऽभिषुत्यम् । अभिषुत्यम् ब्रह्मवादिनः । अभिषुत्यमित्यभि – सुत्यम् । ब्रह्मवादिनो वदन्ति । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति पवित्रवन्तः । पवित्रवन्तोऽन्ये । पवित्रवन्त इति पवित्र – वन्तः । अन्ये ग्रहाः । ग्रहा गृह्यन्ते । गृह्यन्ते किम्पवित्रः । किम्पवित्र उपा॒ꣳशुः । किम्पवित्र इति किम्–पवित्रः । उपा॒ꣳशुरिति । उपा॒ꣳशुरित्युप – अ॒ꣳशुः । इति वाक्पवित्रः । वाक्पवित्र इति । वाक्पवित्र इति वाक् – पवित्रः । इति ब्रूयात् । ब्रूयाद् वाचः । वाचस्पतये । पतये पवस्व । पवस्व वाजिन्न् ।

वाजिन्निति । इत्याह । आह वाचा । वाचैव । एवैनम् । एनम्
पवयति । पवयति वृष्णः । वृष्णो अꣳशुभ्याम् । अꣳशुभ्यामिति ।
अꣳशुभ्यामित्यꣳशु - भ्याम् । इत्याह । आह वृष्णः । वृष्णो हि ।
ह्येतौ । एतावꣳशू । अꣳशू यौ । अꣳशू इत्यꣳशू । यौ सोमस्य ।
सोमस्य गभस्तिपूतः । गभस्तिपूत इति । गभस्तिपूत इति
गभस्ति - पूतः । इत्याह । आह गभस्तिना । गभस्तिना हि ।
ह्येनम् । एनम् पवयति । पवयति देवः । देवो देवानाम् ।
देवानाम् पवित्रम् । पवित्रमसि । असीति । इत्याह । आह देवः ।
देवो हि । ह्येषः । एष सन्न् । **22 (50/59)**

**TS 6.4.5.4 - Kramam**

सन् देवानाम् । देवानाम् पवित्रम् । पवित्रम् ँयेषाम् । येषाम् भागः ।
भागोऽसि । असि तेभ्यः । तेभ्यस्त्वा । त्वेति । इत्याह ।
आह येषाम् । येषाꣳ हि । ह्येषः । एष भागः । भागस्तेभ्यः ।
तेभ्य एनम् । एनम् गृह्णाति । गृह्णाति स्वाङ्कृतः । स्वाङ्कृतोऽसि ।
असीति । इत्याह । आह प्राणम् । प्राणमेव । प्राणमिति प्र-अनम् ।
एव स्वम् । स्वमकृत । अकृत मधुमतीः । मधुमतीर् नः ।

मधुमतीरिति मधु–मतीः । न इषः । इषस्कृधि । कृधीति । इत्याह ।
आह सर्वम् । सर्वमेव । एवास्मै । अस्मा इदम् । इद७ स्वदयति ।
स्वदयति विश्वेभ्यः । विश्वेभ्यस्त्वा । त्वेन्द्रियेभ्यः । इन्द्रियेभ्यो
दिव्येभ्यः । दिव्येभ्यः पार्थिवेभ्यः । पार्थिवेभ्य इति । इत्याह ।
आहोभयेषु । उभयेष्वेव । एव देवमनुष्येषु । देवमनुष्येषु प्राणान् ।
देवमनुष्येष्विति देव – मनुष्येषु । प्राणान् दधाति । प्राणानिति
प्र – अनान् । दधाति मनः । मनस्त्वा । त्वाऽष्टु । **23** (**50/54**)

**TS 6.4.5.5 - Kramam**

अष्ट्विति । इत्याह । आह मनः । मन एव । एवाश्नुते ।
अश्नुत उरु । उर्वन्तरिक्षम् । अन्तरिक्षमनु । अन्विहि । इहीति ।
इत्याह । आहान्तरिक्षदेवत्यः । अन्तरिक्षदेवत्यो हि । अन्तरिक्षदेवत्य
इत्यन्तरिक्ष – देवत्यः । हि प्राणः । प्राणः स्वाहा । प्राण इति
प्र – अनः । स्वाहा त्वा । त्वा सुभवः । सुभवः सूर्याय । सुभव
इति सु – भवः । सूर्यायेति । इत्याह । आह प्राणाः । प्राणा वै ।
प्राणा इति प्र – अनाः । वै स्वभवसः । स्वभवसो देवाः ।
स्वभवस इति स्व – भवसः । देवास्तेषु । तेष्वेव । एव परोक्षम् ।

परोक्षम् जुहोति । परोक्षमिति परः – अक्षम् । जुहोति देवेभ्यः । देवेभ्यस्त्वा । त्वा मरीचिपेभ्य । मरीचिपेभ्य इति । मरीचिपेभ्य इति मरीचि – पेभ्यः । इत्याह । आहादित्यस्य । आदित्यस्य वै । वै रश्मयः । रश्मयो देवाः । देवा मरीचिपाः । मरीचिपास्तेषाम् । मरीचिपा इति मरीचि – पाः । तेषाम् तत् । तद् भागधेयम् । भागधेयम् तान् । भागधेयमिति भाग – धेयम् । तानेव । एव तेन । तेन प्रीणाति । प्रीणाति यदि । यदि कामयेत । कामयेत वर्.षुकः । वर्.षुकः पर्जन्यः । पर्जन्यः स्यात् । **24 (50/59)**

**TS 6.4.5.6 - Kramam**

स्यादिति । इति नीचा । नीचा हस्तेन । हस्तेन नि । नि मृज्यात् । मृज्याद् वृष्टिम् । वृष्टिमेव । एव नि । नि यच्छति । यच्छति यदि । यदि कामयेत । कामयेतावर्.षुकः । अवर्.षुकः स्यात् । स्यादिति । इत्युत्तानेन । उत्तानेन नि । उत्तानेनेत्युत् – तानेन । नि मृज्यात् । मृज्याद् वृष्टिम् । वृष्टिमेव । एवोत् । उद् यच्छति । यच्छति यदि । यद्यभिचरेत् । अभिचरेदमुम् । अभिचरेदित्यभि – चरेत् । अमुम् जहि । जह्यथ । अथ त्वा । त्वा होष्यामि । होष्यामीति ।

इति ब्रूयात् । ब्रूयादाहुतिम् । आहुतिमेव । आहुतिमित्या – हुतिम् ।
एवैनम् । एनम् प्रेप्सन् । प्रेप्सन्. हन्ति । प्रेप्सन्निति प्र–ईप्सन्न् ।
हन्ति यदि । यदि दूरे । दूरे स्यात् । स्यादा । आ तमितोः ।
तमितोस्तिष्ठेत् । तिष्ठेत् प्राणम् । प्राणमेव । प्राणमिति प्र – अनम् ।
एवास्य । अस्यानुगत्य । अनुगत्य हन्ति । अनुगत्येत्यनु – गत्य ।
हन्ति यदि । यद्यभिचरेत् । अभिचरेदमुष्य ।
अभिचरेदित्यभि – चरेत् । अमुष्य त्वा । **25 (50/57)**

**TS 6.4.5.7 - Kramam**

त्वा प्राणे । प्राणे सादयामि । प्राण इति प्र – अने । सादयामीति ।
इति सादयेत् । सादयेदसन्नः । असन्नो वै । वै प्राणः । प्राणः
प्राणम् । प्राण इति प्र – अनः । प्राणमेव । प्राणमिति प्र – अनम् ।
एवास्य । अस्य सादयति । सादयति षड्भिः । षड्भिरꣳशुभिः ।
षड्भिरिति षट् – भिः । अꣳशुभिः पवयति ।
अꣳशुभिरित्यꣳशु – भिः । पवयति षट् । षड् वै । वा ऋतवः ।
ऋतव ऋतुभिः । ऋतुभिरेव । ऋतुभिरित्यृतु – भिः । एवैनम् । एनम्
पवयति । पवयति त्रिः । त्रिः पवयति । पवयति त्रयः । त्रय इमे ।

इमे लोकाः । लोका एभिः । एभिरेव । एवैनम् । एनम् ँलोकैः ।

लोकैः पवयति । पवयति ब्रह्मवादिनः । ब्रह्मवादिनो वदन्ति ।

ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति कस्मात् । कस्माथ् सत्यात् ।

सत्यात् त्रयः । त्रयः पशूनाम् । पशूना॑ हस्तादानाः । हस्तादाना

इति । हस्तादाना इति हस्त – आदानाः । इति यत् । यत् त्रिः ।

त्रिरुपा॒ꣳशुम् । उपा॒ꣳशु॒ꣳ हस्तेन । उपा॒ꣳशुमित्युप – अ॒ꣳशुम् ।

हस्तेन विगृह्णाति । विगृह्णाति तस्मात् । विगृह्णातीति वि – गृह्णाति ।

तस्मात् त्रयः । त्रयः पशूनाम् । पशूना॑ हस्तादानाः । हस्तादानाः

पुरुषः ( ) । हस्तादाना इति हस्त – आदानाः । पुरुषो हस्ती ।

हस्ती मर्कटः । मर्कट इति मर्कटः ॥ **26** (**52/63**)

***(माध्यन्दिन – मष्टावष्टा – वेष – मनस्त्वा – पर्जन्यो – ऽमुष्य – पुरुषो – द्वे च) (A5)***

**TS 6.4.6.1 - Kramam**

देवा वै । वै यत् । यद् यज्ञे । यज्ञेऽकुर्वत । अकुर्वत तत् । तदसुराः ।

असुरा अकुर्वत । अकुर्वत ते । ते देवाः । देवा उपा॒ꣳशौ ।

उपा॒ꣳशौ यज्ञम् । उपा॒ꣳशावित्युप–अ॒ꣳशौ । यज्ञ॒ꣳ स॒ꣳस्थाप्यम् ।

स॒ꣳस्था॒प्यमपश्यन् । स॒ꣳस्था॒प्य॑मिति॒ सम् – स्था॒प्यम् । अ॒प॒श्य॒न्
तम् । तमु॑पा॒ꣳ॒शौ । उ॒पा॒ꣳ॒शौ सम् । उ॒पा॒ꣳ॒शावित्यु॑प – अ॒ꣳ॒शौ ।
सम॑स्थापयन्न् । अ॒स्था॒प॒य॒न् ते । ते॑ऽसुराः । असु॒रा वज्रम् ।
वज्र॑मु॒द्यत्य । उ॒द्यत्य॑ दे॒वान् । उ॒द्यत्येत्यु॑त् – यत्य॑ । दे॒वान॒भि ।
अ॒भ्याय॑न्त । आय॒न्त॒ ते । ते दे॒वाः । दे॒वा बि॒भ्यतः । बि॒भ्य॒त इन्द्रम् ।
इन्द्र॑मुप । उपाधावन्न् । अ॒धा॒व॒न् तान् । तानिन्द्रः । इन्द्रो॑ऽन्तर्या॒मेण ।
अ॒न्त॒र्या॒मे॒णान्तः । अ॒न्त॒र्या॒मेणेत्य॑न्तः – या॒मेन । अ॒न्तर॑धत्त ।
अ॒ध॒त्त॒ तत् । तद॑न्तर्या॒मस्य॑ । अ॒न्त॒र्या॒मस्या॑न्तर्या॒मत्वम् ।
अ॒न्त॒र्या॒मस्येत्य॑न्तः – या॒मस्य॑ । अ॒न्त॒र्या॒म॒त्वम् ँयत् ।
अ॒न्त॒र्या॒म॒त्वमित्य॑न्तर्याम – त्वम् । यद॑न्तर्या॒मः । अ॒न्त॒र्या॒मो गृ॒ह्यते॑ ।
अ॒न्त॒र्या॒म इत्य॑न्तः – या॒मः । गृ॒ह्यते॒ भ्रातृ॑व्यान् । भ्रातृ॑व्याने॒व ।
ए॒व तत् । तद् यज॑मानः । यज॑माने॒ऽन्तः । अ॒न्तर् ध॑त्ते । ध॒त्ते॒ऽन्तः ।
अ॒न्तस्ते॑ । ते॒ द॒धा॒मि॒ । 27 (50/58)

**TS 6.4.6.2 - Kramam**

द॒धा॒मि॒ द्यावा॑पृथि॒वी । द्यावा॑पृथि॒वी अ॒न्तः । द्यावा॑पृथि॒वी इ॒ति
द्या॒वा–पृ॒थि॒वी । अ॒न्तरु॒रु । उ॒र्व॑न्तरि॑क्षम् । अ॒न्तरि॑क्ष॒मिति॑ । इत्या॑ह ।

